# Shri Sharadamatri Stuti

# શ્રીશારદામાતૃસ્તુતિઃ

## Document Information

Text title : Shri Sharadamatri Stuti

File name : shAradAmAtRRistutiH.itx

Category : deities_misc, gurudev, rAmakRiShNa, stuti

Location : doc_deities_misc

Author : Bhandarakara Tryambakasharmana

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદામાતૃસ્તુતિઃ

શ્રી-રામકૃષ્ણમય જીવન સર્વસારા
    સારાધનાખિલજનેષુ દયા પ્રસારા ।
લોકપ્રસૂર્વિજિતજૈત્રમનો વિકારા
    શ્રીશારદા વિજયતે જગદાત્મરૂપા ॥ ૧॥

સા-મ્બાં નિતાન્તમિહ સત્ત્વગુણપ્રધાનાં
    ભક્ત્યા સ્વયં ભગવતા પરિપૂજિતાં ચ ।
દીક્ષાપ્રદાનવિમલીકૃતભક્તચિત્ત
    ચિન્તાસહસ્રપરિહારપરાં નમામઃ ॥ ૨॥

ર-માં કેશવસ્યાપ્યુમાં શૂલપાણેઃ
    પરા મુક્તિદાં ભક્તિમાર્ગપ્રચારામ્ ।
સદાચારમૂર્તિં શિવાં વિશ્વવન્દ્યાં
    નમામીશ્વરીં સારદાં શારદાં તામ્ ॥ ૩॥

દા-ક્ષિણ્યભાવપરિપૂરિત નિર્મલાન્તાં
    તાં લોકસઙ્ગ્રહકૃતે સગુણસ્વરૂપામ્ ।
લોકાતિગાં સ્વયં જાતિગુણ પ્રકારાં
    સન્માતરં મુહુરહં શિરસા નતોઽસ્મિ ॥ ૪॥

મા-ર્તણ્ડદીપ્તિરથ દાહકશક્તિરગ્નેઃ
    સ્વાધારતો ન પૃથગર્હતિ ગન્તુમેવમ્ ।
એકાત્મતામુપગતાઽખિલકાર્યજાતે
    માતઃ સ્વયં ભગવતોઽસ્ય પૃથક્ પ્રકૃત્યા ॥ ૫॥

તૃ-ષ્ણાત્રયજ્વલનશોષિતમાનસાનાં
    નાનાવિધાનકરણૈરનિશં જનાનામ્ ।
યા નિત્યસાન્ત્વનપરા વિપદો હરન્તી
    તાં શારદામભયદાં શિરસા નમામઃ ॥ ૬॥

સ્તુ-વન્તિ માતર્નિખિલાશ્રમાણા-
માદર્શભૂતા ત્વમિહૈકવારમ્ ।
સ્ત્રીભિસ્તવાંશાનુકૃતિઃ કૃતા ચેત્
તજ્જીવનં સ્યાત્ સફલં રસાયામ્ ॥ ૭॥

તિ-ગ્મં ગૃહીત્વા દુરિતં પરેષાં
કષ્ટાન્વિતાન્યાન્ સુખિનઃ કરોષિ ।
અલૌકિકં તે ચરિતં જગત્સુ
સ્વયં શિરસ્ત્વચ્ચરણે નતં નઃ ॥ ૮॥

ઇતિ ભણ્ડારકરોપાહ્વનત્ર્યમ્બકશર્મણાવિરચિતા
"શ્રીશારદામાતૃસ્તુતિઃ" સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Sharadamatri Stuti*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*